संस्कृत

क्र.नं.४४

वेद

# पुरुषसूक्तम्

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥हरिः ॐ॥सहस्रशीर्षापुरुषः
सहस्राक्षःसहस्रपात्॥सभूमिंविश्वतोवृत्वात्य-
तिष्ठद्दशांगुलं॥पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं॥उ-
तामृतत्वस्येशानोयदन्नेनातिरोहति॥एतावानस्य
महिमातोज्यायांश्चपुरुषः॥पादोस्यविश्वाभूतानि
त्रिपा-

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(२)

पांदस्यामृतंदिवि॥त्रिपादूर्ध्वउदैत्पुरुषःपादो
स्येहाभवत्पुनः॥ततोविष्वङ्व्यक्रामत्साश
नानशनेअभि॥तस्माद्विराळजायत
विराजोअधिपूरुषः॥सजातोअत्यरि
च्यतपश्चाद्भूमिमथोपुरः॥३॥यत्पुरुषे
णहविषादेवायज्ञमतन्वत॥वसंतोअ

(3)

स्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ तं य
ज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन
देवा अयजंत साध्या ऋषयश्च ये ॥ तस्मा
द्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं ॥ पशूंस्तां
श्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ तस्
माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञि

(BA)

रे॥ छंदांसि जज्ञिरे तस्माद्यजुस्तस्माद
जायत॥ तस्मादश्वा अजायंत ये के चोभया
दतः॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता
अजावयः॥ २॥ यत्पुरुषं व्यदधुः कतिधा व्य
कल्पयन्॥ मुखं किमस्य कौ बाहू का ऊरू पा
दा उच्येते॥ ब्राह्मणोस्य मुखमासीद्बाहू राज

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

न्यःकृतः॥ऊरूतदस्ययद्वैश्यःपड्भ्यांशूद्रोअ
जायत॥चंद्रमामनसोजातश्चक्षोःसूर्यो
अजायत॥मुखादिंद्रश्चाग्निश्चप्राणाद्वा
युरजायत॥नाभ्याआसीदंतरिक्षंशीर्ष्णो
द्यौःसमवर्त्तत॥पड्भ्यांभूमिर्दिशःश्रोत्रा
त्तथालोकांअकल्पयन्॥सप्तास्यासन्प

(6A)

रिधयः स्त्रिसप्तसमिधः कृताः॥ देवायद्य
ज्ञंतन्वानाअबध्नन्पुरुषंपशुं॥ यज्ञेनय
ज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्या
सन्॥ तेहनाकंमहिमानः सचंतयत्रपूर्वे
साध्याः संतिदेवाः॥ १६॥ अतोदेवाअवंतुनो
यतोविष्णुर्विचक्रमे॥ पृथिव्याः सप्तधाम

(6)

न्निः॥ ३ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदं।
समूळ्हमस्य पांसुरे॥ त्रीणि पदा नि चक्र
मे विष्णुर्गोपा अदाभ्यः॥ अतो धर्माणि धा
रयन्॥ विष्णोः कर्माणि पश्यत यतो व्रता
नि पस्पशे॥ इंद्रस्य युज्यः सखा॥ तद्विष्णोः ४
परमं पदं सदा पश्यंति सूरयः॥ दिवीव चक्ष

(5A)

भुरातंतं॥तद्विप्रासो विपन्यवो जाग्र
वांसः समिंधते॥विष्णोर्यत्परमंपदं॥४॥
देवस्यत्वा सवितुः प्रसवे श्विनो र्बा
हुभ्यांपूष्णो हस्ताभ्यां॥अग्नेस्तेजसा सूर्यस्यव
र्चसेंद्रस्यंद्रियेणाभिषिंचामि॥बलायश्रि
ये यशसेन्नाद्याय॥भूर्भुवःस्वः॥अमृतान

(6)

॥ पुरुषसूक्त समाप्ताः ॥

५

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com